विश्वविद्यालयग्रन्थसंख्या - २८

# शास्त्रार्थदीपिका

(काञ्चीकामकोटिपीठाधीश्वराणां श्रीमच्चन्द्रशेखरेन्द्रसरस्वतीसंयमीन्द्राणां
एकविंशतितमाराधनमहोत्सवसन्दर्भे समायोजितायां विद्वत्सभायां चर्चितानां
शास्त्रार्थविषयाणां स्मारिका)



विहायाद्रिनाथं विभुश्चन्द्रमौलिः विधातुं शुभं भक्तवृन्दाय साक्षात्।
यदाकारलाभात्कृतार्थो बभूव भजे तं गुरुं चन्द्रचूडेन्द्रवाणीम्।।

प्रकाशकः

## संस्कृतभारतीयसंस्कृतिविभागः
## श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः

(विश्वविद्यालयानुदानायोगस्य १९५६ नियमे तृतीयविधिमनुसृत्य संस्थापितः विश्वविद्यालयः)
एनात्तूर्, काञ्चीपुरम्, तमिलनाडु
श्रीजय-धनुः-कृष्ण-द्वादशी
18-12-2014

# शास्त्रार्थदीपिका

(काञ्चीकामकोटिपीठाधीश्वराणां श्रीमच्चन्द्रशेखरेन्द्रसरस्वतीसंयमीन्द्राणाम्
एकत्रिंशतितमाराधनामहोत्सवसन्दर्भे समायोजितायां विद्वत्सभायां चर्चितानां
शास्त्रार्थविषयाणां स्मारिका)


प्रधानसम्पादकः

**प्रो. विष्णुपोत्ति वी.एस्,**

कुलपतयः, श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः

सम्पादकः

**डा. जि. एस्. वि. दत्तात्रेयमूर्तिः**

व्याकरणोपाचार्यः, संस्कृतविभागः, श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः



प्रकाशकः

**संस्कृतभारतीयसंस्कृतिविभागः**

**श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः**

एनात्तूर्, काञ्चीपुरम्, तमिलनाडु

   

☎ : 044-27222115
Fax : 27224305
Email: skmkanci@md3.vsnl.net.in.

உ

Sri Chandramouleeswaraya Namaha:

Sri Sankara Bhaghavadpadacharya Paramparagatha Moolamnaya Sarvagnapeeta :

**His Holiness Sri Kanchi Kamakoti Peetadhipathi**

## JAGADGURU SRI SANKARACHARYA SWAMIGAL

**Srimatam Samsthanam**

**No. 1, Salai Street, KANCHIPURAM - 631 502.**

Date :

येषां यत्नचयोभवत् दृढतमः सच्छास्त्रसंरक्षणे
यल्लक्ष्यं सततं बुधोन्नतिकृते यायत्यमानं ह्यभूत्।
तेषां चन्दिरशेखरेन्द्रयमिनामाराधने पुण्यदे
जीयाच्चन्दिरमौलिवीक्षणचयैराज्यमाना सभा।।

शास्त्रज्ञानं हि विशदीकरोति मनो दृष्टिञ्च। सूक्ष्मवस्तून्यपि शास्त्रज्ञानेनैव गोचरीभवन्ति। शब्दप्रमाणवेद्येषु स्वर्गादिषु शास्त्राण्येव शरणं विपक्षविमर्शनायेति शास्त्राणां महत्त्वं बोभूयते। अस्माकं भारतदेशे गुरुशिष्यपरम्परयाऽनवच्छिन्नतया प्रवर्तितानि प्रसारितानि च शास्त्राण्यद्यापि स्वकीर्तिपताकामुत्तोलयन्ति। किन्तु कलेर्बलात् प्रणालीयं कालेन क्षामेव दृश्यते। अत एव तद्रक्षणार्थं अस्मद्गुरूणां महास्वामिनां सर्वविधोऽपि यत्नोऽवर्तत। तेषामेव एकविंशतितम आराधनामहोत्सवे शास्त्रार्थसभा समायोज्यत इति तत्र विचार्यमाणाः विषयाः ग्रन्थरूपेण प्रकाश्यन्त इति च ज्ञात्वा नितरां मोमुद्यते चेतो नः। सोऽयं यत्नः श्रीमहात्रिपुरसुन्दर्यम्बासमेतश्रीचन्द्रमौलीश्वरकृपया सफलो भूयादिति भागग्रहीतारश्च ऐहिकामुष्मिकमङ्गलपरम्परामवाप्नुयिरिति अस्य समायोजकाश्च भगवत्कृपापात्राणि भूयासुरिति चाशास्महे।

नारायणस्मृतिः।